
॥ श्रीशङ्करभगवत्पादपूजाविधिः ॥

Sri Shankara-Bhagavadpada

Puja Vidhi



ARSHA VIDYA GURUKULAM
P.O. Box 1059
Saylorsburg, PA 18353
(570) 992-2339 Fax (570) 992-7150
www.arshavidya.org

॥ श्रीः ॥



॥ श्रीशङ्करभगवत्पाद पूजाविधिः ॥

आचमनम् । विघ्नेश्वरपूजां कृत्वा ॥ सङ्कल्पः ॥

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

ओं भूः + भूर्भुवस्सुवरोम् । ममोपात्त समस्त दुरित क्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं शुभे दिने शोभने मुहूर्ते आद्यब्रह्मणः द्वितीयपरार्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमे पादे जम्बूद्वीपे भारतवर्षे भरतखण्डे मेरोः दक्षिणे पार्श्वे शकाब्दे अस्मिन् वर्तमाने व्यावहारिके प्रभवादीनां षष्ट्याः संवत्सराणां मध्ये...नाम संवत्सरे उत्तरायणे वसन्तर्तौ...मासे शुक्लपक्षे पञ्चम्यां शुभतिथौ... वासरयुक्तायां...नक्षत्रयुक्तायां शुभनक्षत्र शुभयोग शुभकरण एवंगुण विशेषण विशिष्टायां अस्यां पञ्चम्यां शुभतिथौ अस्माकं सकुटुम्बानां क्षेम-स्थैर्य-वीर्य-विजय-आयुरारोग्य-ऐश्वर्याणां अभिवृद्ध्यर्थं इष्ट-काम्यार्थ-सिद्ध्यर्थं धर्मार्थकाममोक्ष चतुर्विध पुरुषार्थसिद्ध्यर्थं सर्वा-भीष्टसिद्ध्यर्थं वैदिकमार्ग-प्रतिष्ठापकानां जगद्गुरूणां श्रीशङ्करभगव-त्पादानां प्रीत्यर्थं प्रसादसिद्ध्यर्थं वैशाखशुद्धपञ्चम्यां श्रीशङ्करभगव-त्पादपूजां करिष्ये ॥ विघ्नेश्वरं यथास्थानं प्रतिष्ठाप्य । कलशपूजां कृत्वा । घण्टानादं कृत्वा ॥

ध्यानम् :— श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥
अस्मिन् बिम्बे श्रीशङ्करभगवत्पादं ध्यायामि ।

आवाहनम् :—यमाश्रिता गिरां देवी नन्दयत्यात्मसंश्रितान् ।
तमाश्रये श्रिया जुष्टं शङ्करं करुणानिधिम् ॥
श्रीशङ्करभगवत्पादमावाहयामि ।

आसनम् :— श्रीगुरुं भगवत्पादं शरण्यं भक्तवत्सलम् ।
शिवं शिवकरं शुद्धं अप्रमेयं नमाम्यहम् ॥
श्रीशङ्करभगवत्पादाय नमः आसनं समर्पयामि ।

पूर्णकुम्भप्रदानम् :-नित्यं शुद्धं निराकारं निराभासं निरञ्जनम् ।
नित्यबोधं चिदानन्दं गुरुं ब्रह्म नमाम्यहम् ॥
श्रीशङ्करभगवत्पादाचार्येभ्यो नमः पूर्णकुम्भं समर्पयामि ।

पाद्यम् :— सर्वतन्त्रस्वतन्त्राय सदात्माद्वैतरूपिणे ।
श्रीमते शङ्करार्याय वेदान्तगुरवे नमः ॥
श्रीशङ्करभगवत्पादाय नमः पादयोः पाद्यं समर्पयामि ।

अर्घ्यम् :— वेदान्तार्थाभिधानेन सर्वानुग्रहकारिणम् ।
यतिरूपधरं वन्दे शङ्करं लोकशङ्करम् ॥
श्रीशङ्करभगवत्पादाय नमः हस्तयोः अर्घ्यं समर्पयामि ।

आचमनीयम् :— संसाराब्धिनिषण्णाज्ञनिकरप्रोद्दिधीर्षया ।
कृतसंहननं वन्दे भगवत्पादशङ्करम् ॥
श्रीशङ्करभगवत्पादाय नमः आचमनीयं समर्पयामि ।

स्नानम् :— यत्पादपङ्कजध्यानात् तोटकाद्या यतीश्वराः । ५ मा
बभूवुस्तादृशं वन्दे शङ्करं षण्मतेश्वरम् ॥

श्रीशङ्कर भगवत्पादाय नमः स्नापयामि । (श्रीरुद्र - चमक - पुरुषसूक्त - उपनिषद्भिः स्नापयित्वा) स्नानानन्तरं आचमनीयं समर्पयामि

वस्त्रम् :— नमः श्रीशङ्कराचार्यगुरवे शङ्करात्मने ।
शरीरिणां शङ्कराय, शङ्करज्ञानहेतवे ॥

श्रीशङ्करभगवत्पादाय नमः वस्त्रं समर्पयामि ।

उपवीतम् :— हरलीलावताराय, शङ्कराय वरौजसे ।
कैवल्यकलनाकल्पतरवे गुरवे नमः ॥

श्रीशङ्करभगवत्पादाय नमः उपवीतं समर्पयामि ।

आभरणम् :— विचार्य सर्ववेदान्तैः, सञ्चार्य हृदयाम्बुजे ।
प्रचार्य सर्वलोकेषु, आचार्यं शङ्करं भजे ॥

श्रीशङ्करभगवत्पादाय नमः रुद्राक्षमालां समर्पयामि ।

गन्धम् :— याऽनुभूतिः स्वयंज्योतिरादित्येशानविग्रहा ।
शङ्कराख्या च तन्नौमि, सुरेश्वरगुरुं परम् ॥

श्रीशङ्करभगवत्पादाय नमः गन्ध-भस्मादिकं समर्पयामि

दण्डसमर्पणम् :—आनन्दघनमद्वन्द्वं, निर्विकारं निरञ्जनम् ।
भजेऽहं भगवत्पादं, भजतामभयप्रदम् ॥

श्रीशङ्करभगवत्पादाय नमः दण्डं समर्पयामि ।

अक्षतसमर्पणम् :-तं वन्दे शङ्कराचार्यं लोकत्रितयशङ्करम् ।
सत्तर्कनखरोद्दीर्णे, वावदूकमतङ्गजम् ॥

श्रीशङ्करभगवत्पादाय नमः अक्षतान् समर्पयामि ।

पुष्पमाला :— नमामि शङ्कराचार्यगुरुपादसरोरुहम् ।
यस्य प्रसादान्मूढोऽपि, सर्वज्ञो भवति स्वयम् ॥

श्रीशङ्करभगवत्पादाय नमः पुष्पमालां समर्पयामि ।

॥ श्रीः ॥

॥ अङ्गपूजा ॥

ओं अष्टवर्षचतुर्वेदिने नमः	पादौ पूजयामि ।
द्वादशाऽखिलशास्त्रविदे नमः	गुल्फौ पूजयामि ।
सर्वलोकख्यातशीलाय नमः	जङ्घे पूजयामि ।
प्रस्थानत्रयभाष्यकृते नमः	जानुनी पूजयामि ।
पद्मपादादिसच्छिष्याय नमः	ऊरू पूजयामि ।
पाषण्डध्वान्तभास्कराय नमः	कटिं पूजयामि ।
अद्वैतस्थापनाचार्याय नमः	गुह्यं पूजयामि ।
द्वैतादिद्विपकेसरिणे नमः	नाभिं पूजयामि ।
व्यासनन्दितसिद्धान्ताय नमः	उदरं पूजयामि ।
वादनिर्जितमण्डनाय नमः	वक्षस्स्थलं पूजयामि ।
षण्मतस्थापनाचार्याय नमः	हृदयं पूजयामि ।
षड्गुणैश्वर्यमण्डिताय नमः	कण्ठं पूजयामि ।
सर्वलोकानुग्रहकृते नमः	स्कन्धौ पूजयामि ।
सर्वज्ञत्वादिभूषणाय नमः	हस्तौ पूजयामि ।
श्रुतिस्मृतिपुराणज्ञाय नमः	मुखं पूजयामि ।
श्रुत्येकशरणप्रियाय नमः	नेत्रे पूजयामि ।
सकृत्स्मरणसन्तुष्टाय नमः	कर्णौ पूजयामि ।
शरणागतवत्सलाय नमः	नासिकां पूजयामि ।
निर्व्याजकरुणामूर्तये नमः	ललाटं पूजयामि ।
निरहंभावगोचराय नमः	चुबुकं पूजयामि ।
संशान्तभक्तहृत्तापाय नमः	ओष्ठौ पूजयामि ।
सर्वज्ञानफलप्रदाय नमः	गण्डस्थलं पूजयामि ।
सदसद्वस्तुविमुखाय नमः	शिरः पूजयामि ।
सत्तासामान्यविग्रहाय नमः	सर्वाण्यङ्गानि पूजयामि ।

ॐ श्रीगुरुभ्यो नमः

॥ श्रीमच्छङ्करभगवत्पाद-अष्टोत्तरशत-नामावळिः ॥

ॐ श्री शङ्कराचार्य-वर्याय नमः		om śrī śaṅkarācārya-varyāya namaḥ
ॐ ब्रह्मज्ञान-प्रदायकाय नमः		om brahmajñāna-pradāyakāya namaḥ
ॐ अज्ञान-तिमिरादित्याय नमः		om ajñāna-timirādityāya namaḥ
ॐ सुज्ञानाम्बुधि-चन्द्रमसे नमः		om sujñānāmbudhi-candramase namaḥ
ॐ वर्णाश्रम-प्रतिष्ठात्रे नमः		om varṇāśrama-pratiṣṭhātre namaḥ
ॐ श्रीमते नमः		om śrīmate namaḥ
ॐ मुक्ति-प्रदायकाय नमः		om mukti-pradāyakāya namaḥ
ॐ शिष्योपदेश-निरताय नमः		om śiṣyopadeśa-niratāya namaḥ
ॐ भक्ताभीष्ट-प्रदायकाय नमः		om bhaktābhīṣta-pradāyakāya namaḥ
ॐ सूक्ष्मतत्त्व-रहस्यज्ञाय नमः	(10)	om sūkṣmatattva-rahasyajñāya namaḥ
ॐ कार्याकार्य-प्रबोधकाय नमः		om kāryākārya-prabodhakāya namaḥ
ॐ ज्ञानमुद्राञ्चित-कराय नमः		om jñānamudrāñcita-karāya namaḥ
ॐ शिष्यहृत्ताप-हारकाय नमः		om śiṣyahṛttāpa-hārakāya namaḥ
ॐ पारिव्राज्याश्रमोद्धत्रे नमः		om pārivrājyā-śramoddhatre namaḥ
ॐ सर्वतन्त्र-स्वतन्त्रविधे नमः		om sarvatantra-svatantra-vidhe namaḥ
ॐ अद्वैत-स्थापनाचार्याय नमः		om advaita-sthāpanā-cāryāya namaḥ
ॐ साक्षाच्छङ्कर-रूपभृते नमः		om sākṣācchaṅkara-rūpabhṛte namaḥ
ॐ षण्मत-स्थापनाचार्याय नमः		om ṣaṇmata-sthāpanā-cāryāya namaḥ
ॐ त्रयीमार्ग-प्रकाशकाय नमः		om trayīmārga-prakāśakāya namaḥ
ॐ वेदवेदान्त-तत्त्वज्ञाय नमः	(20)	om vedavedānta-tattvajñāya namaḥ
ॐ दुर्वादिमत-खण्डनाय नमः		om durvādimata-khaṇḍanāya namaḥ
ॐ वैराग्यनिरताय नमः		om vairāgyaniratāya namaḥ
ॐ शान्ताय नमः		om śāntāya namaḥ
ॐ संसारार्णव-तारकाय नमः		om saṁsārārṇava-tārakāya namaḥ
ॐ प्रसन्नवदनाम्भोजाय नमः		om prasannavadanāmbhojāya namaḥ
ॐ परमार्थ-प्रकाशकाय नमः		om paramārtha-prakāśakāya namaḥ
ॐ पुराणस्मृति-सारज्ञाय नमः		om purāṇasmṛti-sārajñāya namaḥ

ॐ नित्यतृप्ताय नमः		om nityatṛptāya namaḥ
ॐ महते नमः		om mahate namaḥ
ॐ शुचये नमः	(30)	om śucaye namaḥ
ॐ नित्यानन्दाय नमः		om nityānandāya namaḥ
ॐ निरातङ्काय नमः		om nirātaṅkāya namaḥ
ॐ निस्सङ्गाय नमः		om nissaṅgāya namaḥ
ॐ निर्मलात्मकाय नमः		om nirmalātmakāya namaḥ
ॐ निर्ममाय नमः		om nirmamāya namaḥ
ॐ निरहङ्काराय नमः		om nirahaṅkārāya namaḥ
ॐ विश्ववन्द्य-पादाम्बुजाय नमः		om viśvavandya-pādāmbujāya namaḥ
ॐ सत्त्वप्रधानाय नमः		om sattvapradhānāya namaḥ
ॐ सद्भावाय नमः		om sadbhāvāya namaḥ
ॐ सङ्ख्यातीत-गुणोज्ज्वलाय नमः	(40)	om saṅkhyātīta-guṇojjvalāya namaḥ
ॐ अनघाय नमः		om anaghāya namaḥ
ॐ सारहृदयाय नमः		om sārahṛdayāya namaḥ
ॐ सुधिये नमः		om sudhiye namaḥ
ॐ सारस्वतप्रदाय नमः		om sārasvatapradāya namaḥ
ॐ सत्यात्मने नमः		om satyātmane namaḥ
ॐ पुण्यशीलाय नमः		om puṇyaśīlāya namaḥ
ॐ साङ्ख्ययोग-विचक्षणाय नमः		om sāṅkhyayoga-vicakṣaṇāya namaḥ
ॐ तपोराशये नमः		om taporāśaye namaḥ
ॐ महातेजसे नामः		om mahātejase nāmaḥ
ॐ गुणत्रय-विभागविदे नमः	(50)	om guṇatraya-vibhāgavide namaḥ
ॐ कलिघ्नाय नमः		om kalighnāya namaḥ
ॐ काल-धर्मज्ञाय नमः		om kāla-dharmajñāya namaḥ
ॐ तमोगुण-निवारकाय नमः		om tamoguṇa-nivārakāya namaḥ
ॐ भगवते नमः		om bhagavate namaḥ

ॐ भारतीजेत्रे नमः	om bhāratījetre namaḥ
ॐ शारदाह्वान-पण्डिताय नमः	om śāradāhvāna-paṇḍitāya namaḥ
ॐ धर्माधर्म-विभागज्ञाय नमः	om dharmādharma-vibhāgajñāya namaḥ
ॐ लक्ष्यभेद-प्रदर्शकाय नमः	om lakṣyabheda-pradarśakāya namaḥ
ॐ नादबिन्दु-कलाभिज्ञाय नमः	om nādabindu-kalābhijñāya namaḥ
ॐ योगिहृत्पद्म-भास्कराय नमः (60)	om yogihṛtpadma-bhāskarāya namaḥ
ॐ अतीन्द्रिय-ज्ञान-निधये नमः	om atīndriya-jñāna-nidhaye namaḥ
ॐ नित्यानित्य-विवेकवते नमः	om nityānitya-vivekavate namaḥ
ॐ चिदानन्दाय नमः	om cidānandāya namaḥ
ॐ चिन्मयात्मने नमः	om cinmayātmane namaḥ
ॐ परकाय-प्रवेश-कृते नमः	om parakāya-praveśa-kṛte namaḥ
ॐ अमानुष-चरित्राढ्याय नमः	om amānuṣa-caritrāḍhyāya namaḥ
ॐ क्षेमदायिने नमः	om kṣemadāyine namaḥ
ॐ क्षमाकराय नमः	om kṣamākarāya namaḥ
ॐ भव्याय नमः	om bhavyāya namaḥ
ॐ भद्रप्रदाय नमः (70)	om bhadrapradāya namaḥ
ॐ भूरि-महिम्ने नमः	om bhūri-mahimne namaḥ
ॐ विश्वरञ्जकाय नमः	om viśvarañjakāya namaḥ
ॐ स्वप्रकाशाय नमः	om svaprakāśāya namaḥ
ॐ सदाधाराय नमः	om sadādhārāya namaḥ
ॐ विश्वबन्धवे नमः	om viśvabandhave namaḥ
ॐ शुभोदयाय नमः	om śubhodayāya namaḥ
ॐ विशाल-कीर्तये नमः	om viśāla-kīrtaye namaḥ
ॐ वागीशाय नमः	om vāgīśāya namaḥ
ॐ सर्वलोक-हितोत्सुकाय नमः	om sarvaloka-hitotsukāya namaḥ
ॐ कैलासयात्रा-संप्राप्त-चन्द्रमौलि- प्रपूजकाय नमः (80)	om kailāsayātrā-samprāpta-candramauli- prapūjakāya namaḥ
ॐ काञ्च्यां श्रीचक्रराजाख्य -- यन्त्र-स्थापन-दीक्षिताय नमः	om kāñcyāṁ śrīcakrarājākhya -- yantra-sthāpana-dīkṣitāya namaḥ

ॐ श्रिचक्रात्मक-ताटङ्क-पोषिताम्बा-मनोरथाय नमः	om śricakrātmaka-tātaṅka-poṣitāmbā-manorathāya namaḥ
ॐ श्रिब्रह्मसूत्रोपनिषद्-भाष्यादि-ग्रन्थ-कल्पकाय नमः	om śribrahmasūtropaniṣad-bhāṣyādi-grantha-kalpakāya...
ॐ चतुर्दिक् चतुराम्नाय प्रतिष्टात्रे नमः	om caturdik caturāmnāya pratiṣṭātre namaḥ
ॐ महामतये नमः	om mahāmataye namaḥ
ॐ द्विसप्तति-मतोच्छेत्रे नमः	om dvisaptati-matocchetre namaḥ
ॐ सर्वदिग् -विजयप्रभवे नमः	om sarvadig -vijayaprabhave namaḥ
ॐ काषाय-वसनोपेताय नमः	om kāṣāya-vasanopetāya namaḥ
ॐ भस्मोद्धूळित-विग्रहाय नमः	om bhasmoddhūḷita-vigrahāya namaḥ
ॐ ज्ञानत्मकैक-दन्डाढचाय नमः (90)	om jñānatmakaika-danḍāḍhyāya namaḥ
ॐ कमण्डलु-लसत्कराय नमः	om kamaṇḍalu-lasatkarāya namaḥ
ॐ व्यास-सन्दर्शन-प्रीताय नमः	om vyāsa-sandarśana-prītāya namaḥ
ॐ भगवत्पाद-संज्ञकाय नमः	om bhagavatpāda-sañjñakāya namaḥ
ॐ चतुष्षष्टि-कलाभिज्ञाय नमः	om catuṣṣaṣṭi-kalābhijñāya namaḥ
ॐ ब्रह्मराक्षस-तोषकाय नमः	om brahmarākṣasa-toṣakāya namaḥ
ॐ सौन्दर्यलहरी-मुख्यबहुस्तोत्र-विधायकाय नमः	om saundaryalaharī-mukhyabahustotra-vidhāyakāya namaḥ
ॐ श्रीमन्मण्डनमिश्राख्य-स्वयम्भू- --	om śrīmanmaṇḍanamiśrākhya-svayambhū- --
जयसन्नुताय नमः	jayasannutāya namaḥ
ॐ तोटकाचार्य संपूज्याय नमः	om toṭakācārya sampūjyāya namaḥ
ॐ पद्मपादार्चिताङ्घ्रिकाय नमः	om padmapādā-rcitāṅghrikāya namaḥ
ॐ हस्तामलक-योगीन्द्र-ब्रह्मज्ञान-प्रदायकाय नमः (100)	om hastāmalaka-yogīndra-brahmajñāna-pradāyakāya namaḥ
ॐ सुरेश्वरादि षट्च्छिष्य-संन्यासाश्रमदायकाय नमः	om sureśvarādi ṣaṭcchiṣya-sannyāsāśramadāyakāya namaḥ
ॐ श्री शङ्करभगवत्पादाय नमः	om śrī śaṅkarabhagavatpādāya namaḥ
ॐ निर्व्याज-करुणा-मूर्तये नमः	om nirvyāja-karuṇā-mūrtaye namaḥ
ॐ जगत्पूज्याय नमः	om jagatpūjyāya namaḥ
ॐ जगद्गुरवे नमः	om jagadgurave namaḥ
ॐ भेरीपट-हवाद्यादि-राजलक्षण-लक्षिताय नमः	om bherīpaṭa-havādyādi-rājalakṣaṇa-lakṣitāya namaḥ
ॐ सकृत्स्मरण-सन्तुष्टाय नमः	om sakṛtsmaraṇa-santuṣṭāya namaḥ
ॐ सर्वज्ञाय नमः	om sarvajñāya namaḥ
ॐ ज्ञानदायकाय नमः	om jñānadāyakāya namaḥ

॥ श्रीमच्छङ्कर-भगवत्पाद-अष्टोत्तरशत-नामावलिः ॥

हरिः ॐ तत्सत्

धूपम् :— संसारसागरं घोरं, अनन्तक्लेशभाजनम् ।
त्वामेव शरणं प्राप्य, निस्तरन्ति मनीषिणः ॥

श्रीशङ्करभगवत्पादाय नमः धूपमाघ्रापयामि ।

दीपम् :— नमस्तस्मै भगवते, शङ्कराचार्यरूपिणे ।
येन वेदान्तविद्येयं, उद्धृता वेदसागरात् ॥

श्री शङ्करभगवत्पादाय नमः दीपं दर्शयामि ।

नैवेद्यम् :— भगवत्पादपादाब्जपांसवस्सन्तु सन्ततम् ।
अपारासार संसार,सागरोत्तार सेतवः ॥

श्रीशङ्करभगवत्पादाय नमः शाल्यन्नं षड्रसोपेतं चतुर्विधभक्ष्य-भोज्य-लेह्यचोष्यसहितं महानैवेद्यं निवेदयामि । निवेदनानन्तरं आचमनीयं समर्पयामि । हस्तप्रक्षाळन-पादप्रक्षाळनादिकं समर्पयामि ॥ ताम्बूलं समर्पयामि ।

नीराजनम् :— अज्ञानतिमिरान्धस्य, ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन, तस्मै श्रीगुरवे नमः ॥

श्रीशङ्करभगवत्पादाय नमः कर्पूरनीराजनं दर्शयामि । नीराजनानन्तरं आचमनीयं समर्पयामि ॥

यानि कानि च पापानि जन्मान्तरकृतानि च । पा
तानि तानि विनश्यन्ति प्रदक्षिण पदेपदे ॥

आचार्यान् भगवत्पादान्, षण्मतस्थापकान् हितान् ।
परहंसान्नुमोऽद्वैतस्थापकान् जगतो गुरून् ॥
प्रदक्षिण नमस्कारान्, समर्पयामि ।

प्रार्थना :—

गुरुर्ब्रह्मा गुरुर्विष्णु, र्गुरुर्देवो महेश्वरः ।
गुरुरेव परं ब्रह्म, तस्मै श्रीगुरवे नमः ॥

अखण्डमण्डलाकारं, व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन, तस्मै श्रीगुरवे नमः ॥

अनेकजन्म संप्राप्त, कर्मबन्ध विदाहिने ।
आत्मज्ञान प्रदानेन, तस्मै श्रीगुरवे नमः ॥

विशुद्ध विज्ञानघनं, शुचिहार्दं तमोनुदम् ।
दयासिन्धुं लोकबन्धुं, शङ्करं नौमि सद्गुरुम् ॥

देहबुद्ध्या तु दासोऽस्मि, जीवबुद्ध्या त्वदंशकः ।
आत्मबुद्ध्या त्वमेवाहमिति मे निश्चिता मतिः ॥

एकश्शाखी शङ्कराख्यश्चतुर्धा स्थानं, भेजे तापशान्त्यै जनानाम् ।
शिष्यस्कन्धैः शिष्य शाखैर्महद्भिः, ज्ञानं पुष्पं यत्र मोक्षः प्रसूतिः ॥

गामाक्रम्य पदेऽधिकाञ्चि निबिडं, स्कन्धै श्चतुर्भिस्तथा
व्यावृण्वन् भुवनान्तरं परिहरंस्तापं समोहज्वरम् ।
यश्शाखी द्विजसंस्तुतः फलति तत्, स्वाद्यं रसाख्यं फलम्
तस्मै शङ्करपादपाय महते, तन्मः त्रिसन्ध्यं नमः ॥

गुरुपादोदकप्राशनम् :—

अविद्यामूलनाशाय जन्मकर्मनिवृत्तये ।
ज्ञानवैराग्य सिद्ध्यर्थं गुरुपादोदकं शुभम् ॥
गुरुपादोदकं प्राशयामि ।

कायेन वाचा मनसेन्द्रियैर्वा बुध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥

अनया पूजया सर्वदेवात्मकः भगवान् श्रीजगद्गुरुः प्रीयताम् ॥
ओं तत् सत् ॥

।। श्रीः ।।

।। श्री तोटकाष्टकम् ।।

विदिताखिलशास्त्रसुधाजलधे महितोपनिषत्कथितार्थनिधे ।
हृदये कलये विमलं चरणं भव शङ्कर देशिक मे शरणम् ।।

करुणावरुणालय पालय मां भवसागरदुःखविदूनहृदम् ।
रचयाखिलदर्शनतत्त्वविदं भव शङ्कर देशिक मे शरणम् ।।

भवता जनता सुहिता भविता निजबोधविचारणचारुमते ।
कलयेश्वरजीवविवेकविदं भव शङ्कर देशिक मे शरणम् ।।

भव एव भवानिति मे नितरां समजायत चेतसि कौतुकिता ।
मम वारय मोहमहाजलधिं भव शङ्कर देशिक मे शरणम् ।।

सुकृतेऽधिकृते बहुधा भवतः भविता समदर्शनलालसता ।
अतिदीनमिमं परिपालय मां भव शङ्कर देशिक मे शरणम् ।।

जगतीमवितुं कलिताकृतयो विचरन्ति महामहसश्छलतः ।
अहिमांशुरिवात्र विभासि पुरो भव शङ्कर देशिक मे शरणम् ।।

गुरुपुङ्गव पुङ्गवकेतन ते समतामयतां नहि कोऽपि सुधीः ।
शरणागतवत्सल तत्त्वनिधे भव शङ्कर देशिक मे शरणम् ।।

विदिता न मया विशदैककला न च किञ्चन काञ्चनमस्ति गुरो ।
द्रुतमेव विधेहि कृपां सहजां भव शङ्कर देशिक मे शरणम् ।।